# Rishi Agastyaproktam Shivapujasadhanani 5 Shivarchane Gocharanusarapujopadesham

# ઋષિ અગસ્ત્યપ્રોક્તં શિવપૂજાસાધનાનિ ૫ શિવાર્ચને ગોચરાનુસારપૂજોપદેશમ્

## Document Information

Text title : Rishi Agastyaproktam Shivapujasadhanani 5 Shivarchane Gocharanusarapujopadesham

File name : shivapUjAsAdhanAni5shivArchanegocharAnusArapUjopadesham.itx

Category : shiva, shivarahasya, pUjA, pUjA, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 26 kumbhaghoNamahimAnuvarNanam | 229-237||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 17, 2024

*sanskritdocuments.org*

Rishi Agastyaproktam Shivapujasadhanani 5 Shivarchane Gocharanusarapujopadesham

# ઋષિ અગસ્ત્યપ્રોક્તં શિવપૂજાસાધનાનિ ૫ શિવાર્ચને ગોચરાનુસારપૂજોપદેશમ્

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)

અગસ્ત્યઃ (ઉવાચ)

મીનકર્કટયોર્મધ્યે જલધારાં મહેશ્વરે ।
યઃ કલ્પયેદવિચ્છિન્નાં સ મોક્ષમધિગચ્છતિ ॥ ૨૨૯॥

શિવં મકરસઙ્ક્રાન્તૌ દુગ્ધાદ્યૈઃ પ્રસ્થસમ્મિતૈઃ ।
અભિષિચ્ય પ્રયત્નેન શુદ્ધૈરપિ જલૈર્નવૈઃ ॥ ૨૩૦॥

ભસ્મ બિલ્વાદિભિઃ સમ્યક્ પૂજયિત્વા મહેશ્વરમ્ ।
સઙ્કલ્પપૂર્વં યત્નેન નૈવેદ્યં તુ પ્રકલ્પયેત્ ॥ ૨૩૧॥

શતપ્રસ્થમિતઃ કૃષ્ણૈઃ શ્વેતૈર્વા ક્ષાલિતૈસ્તિલૈઃ ।
પૂજનીયસ્તતો ભક્ત્યા લિઙ્ગરૂપી સદાશિવઃ ॥ ૨૩૨॥

સિંહ્માદિષ્વપિ સઙ્ક્રાન્તિષ્વેવમેવ સદાશિવઃ ।
પૂજનીયો મહાદેવો વિષુવેષ્વયનેષ્વપિ ॥ ૨૩૩॥

યુગાદિષ્વપિ સમ્પૂજ્યો મન્વાદિષ્વપિ શઙ્કરઃ ।
એવમેવ શિવઃ પૂજ્યો ગ્રહણે ચન્દ્રસૂર્યયોઃ ॥ ૨૩૪॥

એવં યઃ કુરુતે ભક્ત્યા લિઙ્ગપૂજાં મહેશ્વરે ।
સ મહાપાતકેભ્યોઽપિ મુચ્યતે નાત્ર સંશયઃ ॥ ૨૩૫॥

તિલૈઃ પૂજાં પ્રયત્નેન સ્વસ્વાઞ્જલિમિતૈઃ સદા ।
યઃ કરોતિ સ પાપેભ્યઃ સર્વેભ્યોઽપિ વિમુચ્યતે ॥ ૨૩૬॥

એવમેવ મહાદેવં યો નિત્યં શ્વેતસર્ષપૈઃ ।
ભક્ત્યા સમ્પૂજયેદ્વિપ્રઃ સ પાપેભ્યો વિમુચ્યતે ॥ ૨૩૭॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋષિ અગસ્ત્યપ્રોક્તં શિવપૂજાસાધનાનિ ૫ - શિવાર્ચને ગોચરાનુસારપૂજોપદેશં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૬ કુમ્ભઘોણમહિમાનુવર્ણનમ્ । ૨૨૯-૨૩૭ ॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 26 kumbhaghoNamahimAnuvarNa
. 229-237..

Notes:
Ṛṣi Agastya ઋષિ અગસ્ત્ય; after delivering Upadeśa ઉપદેશ (to Dvija દ્વિજ) about offering of the Ghṛtakambalam ઘૃતકમ્બલમ્ with respect to worship of Śiva શિવ, continues to outline the offerings in accordance with Astronomical/Celestial Transits and Alignments. These include Mīnakarkaṭayormadhye mInakarkaTayormadhye (Solar Transit between Pisces and Cancer); Makara Saṅkrānti મકર સઙ્ક્રાન્તિ; Siṃha etc. Saṅkrānti-s સિંહાદિ સઙ્ક્રાન્તયઃ; Viṣuva વિષુવ (Equinoxes) and Grahaṇa ગ્રહણ (Eclipses).
Ghṛtakambalam ઘૃતકમ્બલમ્ offering was previously specified for Māgha māsa માઘ માસ at night of commencement of Māgha Pūrṇimā માઘ પૂર્ણિમા; and finds a detailed mention in the Adhyāyaḥ 26 અધ્યાયઃ ૨૬ of ŚivaRahasyam Saptamāṁśaḥ શિવરહસ્યમ્ સપ્તમાંશઃ and in the Kāmika Āgama કામિક આગમ.
The Adhyāyaḥ 26 અધ્યાયઃ ૨૬ of ŚivaRahasyam Saptamāṁśaḥ શિવરહસ્યમ્ સપ્તમાંશઃ has several other details about Śivapūjāsādhanāni શિવપૂજાસાધનાનિ.

Proofread by Ruma Dewan

*Rishi Agastyaproktam Shivapujasadhanani 5 Shivarchane Gocharanusarapujopadesham*
pdf was typeset on June 17, 2024

Please send corrections to *sanskrit@cheerful.com*